अष्टमः पाठः

# न धर्मवृद्धेषु वयः समीक्ष्यते



**वदन्तु भवन्तः, किं वक्रे देहे आत्मा वक्रः भवति?**

**छात्राः** आचार्य! नमामः

**आचार्यः** चिरं जीवत। यशस्विनः भवत।

**छात्राः** अनुगृहीताः स्मः।

**राघवः** आचार्य! धर्मवृद्धः कः भवति?

**आचार्यः** भवान् किं मन्यते?

**राघवः** (चिन्तयित्वा) हुँ . . . . . . . यः धर्मे वृद्धः।

**आचार्यः** सत्यं परन्तु कस्तावत् धर्मः?

**माधवः** अहं वदानि गुरुवर! धार्यते सः धर्मः। अतः धर्मः नाम कर्तव्यम्।

**आचार्यः** शोभनम्! यः कर्तव्यपरायणः गुणी च भवति तस्य आयुः न गण्यते।

**राघवः** तत् कथम्?

**आचार्यः** महाभारतात् गृहीताम् इमां कथां पठत, यत्र एकः द्वादशवर्षीयः बालकः अष्टावक्रः राज्ञः जनकस्य सभासदान् ज्ञानेन अजयत्।

**छात्राः** धन्यं खलु भारतम्, यत्र बालाः अपि एवं ज्ञानवृद्धाः।

अष्टमः पाठः

# न धर्मवृद्धेषु वयः समीक्ष्यते

बालः अष्टावक्रः मित्रैः सह क्रीडित्वा गृहं प्रत्यावृत्तः। स जननीम् अपृच्छत् ''मातः! क्व आस्ते मम पिता'' इति। साऽवदत्– ''जात! तव पिता राजर्षेः जनकस्य सभां विद्वद्भिः सह शास्त्रार्थाय गतः आसीत्, किन्तु अधुना यावत् न प्रतिनिवृत्तः। अहमपि चिन्तातुरा अस्मि।'' इदं निशम्य अष्टावक्रः प्रत्यवदत् ''जननि! अलं चिन्तया। श्वः प्रभाते एव अहं राजसभां गत्वा ज्ञास्यामि का वार्ता'' इति। माताऽवदत् ''त्वं बालोऽसि। राजसभायां तव प्रवेशो न सुलभः। तत्र तव उपहासोऽपि सम्भाव्यते।'' विलक्षणप्रतिभासम्पन्नः सर्वशास्त्रपारङ्गतः अष्टावक्रः अभाषत ''मातः! मा भैषीः ईदृशीं तादृशीं वा आशङ्कां मा विधेहि। अहं पित्रा सह क्षिप्रमागमिष्यामि।''

इत्युक्त्वा मात्रा अनुमतः अष्टावक्रः राजसभां गतः। कथमपि सभायां लब्धप्रवेशः स राजानं सविनयं प्राणमत्। तस्य वक्रदेहं वीक्ष्य सभास्थिताः पण्डिताः तारस्वरेण अहसन्। ''एष बालः अस्माभिः सह शास्त्रार्थम् अपि करिष्यति'' इति ज्ञात्वा ते अन्योऽन्यं पश्यन्तः स्मितम् अकुर्वन्। तेषां पण्डितानां चेष्टितं दृष्ट्वा अष्टावक्रः उच्चैः हसितुम् आरभत।

तं हसन्तं विलोक्य सर्वे सभास्थिताः विद्वांसः स्तब्धाः अभवन्। राज्ञा हास्यकारणं पृष्टम्। अष्टावक्रः अवदत्–''राजन् मया श्रुतम् आसीत् यद् भवतः राजसभा आत्मतत्त्वज्ञैः शास्त्ररहस्यवेदिभिः विद्वद्भिः अलङ्कृताऽस्ति, किन्तु सभां प्रविश्य पश्यामि, यत् एते पण्डिताः मम वक्रदेहं दृष्ट्वा हसन्ति, अहमपि मिथ्याज्ञानगर्वितान् एतान् दृष्ट्वा हसामि।''

स पुनः अवदत् – ''राजन् पृच्छामि ननु अस्मिन् अस्थि–रुधिर–मांस–मेदोभरिते चर्मवेष्टिते देहे किम् अस्ति दर्शनीयम्? सर्वसाक्षी, निर्लेपः नित्यः निराकारश्च आत्मा कथं न दृश्यते ? वदन्तु भवन्तः, किं वक्रे देहे आत्मा वक्रः भवति ? यदि नदी वक्रा किं तस्याः जलमपि वक्रम्''?

राज्ञः जनकस्य अनुमत्या अष्टावक्रः पण्डितैः सह शास्त्रार्थं कृत्वा तान् अजयत्। अष्टावक्रस्य आत्मज्ञानं शास्त्रपाण्डित्यं बुद्धिपाटवं संयमादिगुणजातं च निरीक्ष्य राजर्षिः जनकः प्रभावितः भूत्वा तस्मै निवेदितवान् ''भगवन्! अहं भवद्दर्शनैः आत्मानं धन्यं मन्ये। इच्छामि भवद्भ्यः किञ्चिद् दातुम्।'' अष्टावक्रः प्रत्यवदत्– ''यदि भवान् इच्छति, तदा यद् वस्तु भवदीयम् अस्ति, तत् मह्यम् अर्पय''।

**जनकः** राज्यम् अर्पयामि?

**अष्टावक्रः** राज्यं भवदीयं नास्ति। एतत् वंशपरम्पराप्राप्तम्।

**जनकः** धनं ददामि?

**अष्टावक्रः** धनं भवदीयं नास्ति। एतत् प्रजायाः सकाशाद् आगतम्।

**जनकः** शरीरं प्रयच्छामि?

**अष्टावक्रः** आत्मा शरीरस्य अध्यक्षः न भवान्।

**जनकः** स्वकीयं मनः समर्पयामि?

**अष्टावक्रः** अस्तु इदम् एव अस्तु। दीयतां मे स्वमनः।

**जनकः** भगवन्! दत्तं मया स्वमनः भवते। सम्प्रति आदिशतु मां राजकार्याय।

**अष्टावक्रः** कथं भवान् करिष्यति राजकार्यम् ? भवतः मनः तु मम अधीनम्। मनसा शून्यः भवान् सङ्कल्पविकल्पौ कर्तुं न अर्हति।

**जनकः** (आत्मगतम्) कीदृशीं दशां प्राप्तोऽहम्। शान्ते मनसि अपूर्वा आनन्दानुभूतिः। परं कथं लौकिकं व्यवहारं करोमि–

**न कर्तुं समर्थोऽस्मि चर्चां विचारं,**
**न यज्ञं न दानं न मानं विहारं,**
**प्रकुर्यां कथं पालनं मे प्रजायाः,**
**क्षणो नास्ति लभ्यो यदा कल्पनायाः।**

(प्रकाशम्) भगवन्! मम मार्गदर्शनं क्रियताम्। भवान् एव मे गुरुः। (पादयोः पतति)

प्रीतः अष्टावक्रः तं बहुविधं ज्ञानम् आत्मतत्त्वं च बोधयति। अत उच्यते,

**"न धर्मवृद्धेषु वयः समीक्ष्यते"।**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनुमतः**<br>(वि०)[अनु+मन्+क्त, प्र०ए०व०] | अनुमतिं प्राप्तः | आज्ञा पाकर | permitted. |
| **आस्ते**<br>(क्रि०) (आस्० लट् प्र०पु०ए०व०] | अस्ति, विद्यते | है, विद्यमान है | is. |
| **चर्मवेष्टिते**<br>(वि०) [चर्मणा वेष्टितं तस्मिन् (तृ०त०पु०] | चर्मणा आवृते | चमड़े से ढके हुए में | on the body covered with skin. |
| **तारस्वरेण**<br>(सं०)(पुं०तृ०ए०व०) | उच्चैः स्वरेण | ऊँचे स्वर से | with high pitch. |
| **धर्मवृद्धेषु**<br>(सं०) (पुं० स०ब०व०)<br>[धर्मे वृद्धः तेषु (स०त०)] | धर्मज्ञेषु | धर्म ज्ञानियों में | amongst virtuous. |
| **निराकारः**<br>(वि ०)[निर्गतः आकारः यस्मात् सः (ब०व्री०)] | आकाररहितः | बिना आकृति के | without any form. |
| **निवेश्य**<br>(अव्य०) [नि+विश्+णिच्+ल्यप्] | स्थापयित्वा | रखकर | having placed. |

| | | | |
|---|---|---|---|
| **पश्यन्तः**<br>(वि०) [दृश्+शतृ प्र०ब०व०] | अवलोकयन्तः | देखते हुए | looking at, seeing. |
| **प्रतिनिवृत्तः**<br>(वि०)(पुं०प्र०ए०व)[प्रति+नि+वृत्+क्त ] | प्रत्यागतः | लौट आया | returned. |
| **प्रत्यावृत्तः**<br>(वि०)[प्रति+आ+वृत्+क्त पुं०प्र०ए०] | प्रत्यागतः | लौटा | returned, come back. |
| **प्राणमत्**<br>(क्रि०) [प्र+अनमत्, नम्+लङ् प्र०पु०ए०व०) | प्रणामम् अकरोत् | प्रणाम किया | bowed down, saluted. |
| **बुद्धिपाटवम्**<br>(सं०) [बुद्धेः पाटवम् (ष०त०पु०)] | मतिनैपुण्यम् | बुद्धि की चतुराई को | intelligence. |
| **भवदीयम्**<br>(वि०)[भवत्+छ] | भवत्सम्बद्धम् | आप से सम्बन्ध रखने वाला, आप का | yours. |
| **मिथ्याज्ञानगर्वितान्**<br>(वि०)[मिथ्याज्ञानेन गर्विताः तान् (तृ०त०पुं०)] (पु०द्वि०ब०व०) | मिथ्याज्ञानेन गर्वं कुर्वतः | झूठे ज्ञान से गर्व करने वालों को | to pedantic persons. |
| **लब्धप्रवेशः**<br>(वि०)(पुं०प्र०ए०व०)<br>[लब्धः प्रवेशः येन (ब्र०वी०)] | प्राप्तप्रवेशः | जिसने प्रवेश प्राप्त किया है | one who has entered. |
| **वक्रदेहः**<br>(वि०) वक्रः देहः यस्य सः (ब०व्री०) | वक्रशरीरः | टेढ़े शरीर वाला | one with deformed limbs. |
| **विधेहि**<br>(क्रि०) [वि+धा+लो० म०पु०ए०व०] | कुरु | करो | do. |
| **विरम**<br>(क्रि०)[वि+रम्+लो०, म०पु०ए०व०] | विरतः भव | रुको हट जाओ | stop, don't go. |
| **विलक्षणप्रतिभासम्पन्नः**<br>(वि०)[विलक्षणा चासौ प्रतिभा–विलक्षणप्रतिभा (कर्मधा०) तया सम्पन्नः (तृ०त०पु०)] | विशिष्टमेधया युक्तः | अद्भुत प्रतिभा से युक्त | genious, highly intelligent. |
| **शास्त्रपाण्डित्यम्**<br>(सं०)(नपुं०प्र०ए०व०]<br>[शास्त्रेषु पाण्डित्यम् (स०त०)] | शास्त्रेषु कुशलताम् | शास्त्रों में प्रवीणता को | erudition/ scholarship in scriptures. |
| **शास्त्ररहस्यवेदिभिः**<br>(सं०)(पु०तृ०ब०व०] [शास्त्राणां रहस्यं शास्त्ररहस्यम्, तस्य वेदिनः तैः, ष०त०पु०] | शास्त्ररहस्यज्ञातृभिः | शास्त्रों के रहस्य को जानने वालों से | with the persons knowing the secret (essence) of shastras. |

| | | | |
|---|---|---|---|
| **सङ्कल्पविकल्पौ**<br>(सं०)(पुं०प्र०द्वि०व०)<br>[सङ्कल्पः च विकल्पः च द्व०स०] | ऊहापोहौ<br>(ऊह–अपोहौ) | विकल्पसहित सोच समझकर करना | deciding something with its alternatives. |
| **सर्वसाक्षी**<br>(वि०) (पु०प्र०ए०व०)<br>[सर्वेषां साक्षी० (ष०त०)] | सर्वद्रष्टा | सबको देखने वाला, सबका गवाह | one who witnesses everything. |
| **स्तब्धाः**<br>(वि०)(पुं० प्र०ब०व०) [स्तम्भ्+क्त] | जडीभूताः | हक्के बक्के रह गए | stunned. |
| **स्मितम्**<br>(स०)(नपुं०प्र०ए०व०)[स्मि+क्त] | अल्पहसितम् | मुस्कराहट | smile. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

साऽवदत् = सा+अवदत्
इत्युक्त्वा = इति+उक्त्वा
निराकारश्च = निराकारः+च
धनं ददामि = धनम्+ददामि
अत उच्यते = अतः+उच्यते
बालोऽपि = बालः+अपि
अन्योऽन्यम् = अन्यः+अन्यम्
भवद्दर्शनैः = भवत्+दर्शनैः
प्राप्तोऽहम् = प्राप्तः+अहम्
चिन्तातुरा = चिन्ता+आतुरा

### सन्धिकार्यम्

पण्डितैः+सह = पण्डितैस्सह
क्व+आस्ते = क्वास्ते
एतत्+वंशपरम्पराप्राप्तम् = एतद् वंशपरम्पराप्राप्तम्
मनः+तु = मनस्तु
प्रतिभावितः+भूत्वा = प्रतिभावितो भूत्वा
मात्रा+अनुमतः = मात्रानुमतः
शरीरस्य+अध्यक्षः = शरीरस्याध्यक्षः
लब्धप्रवेशः+सः = लब्धप्रवेशस्सः

### संयोगः

अहमपि = अहम्+अपि
क्षिप्रमागमिष्यामि = क्षिप्रम्+आगमिष्यामि
कथमपि = कथम्+अपि
समीक्ष्यते = सम्+ईक्ष्यते

# अभ्यासः

1. **अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत –**

(क) मित्रैः सह क्रीडित्वा कः गृहम् प्रत्यावृत्तः ? ........................................

(ख) अष्टावक्रस्य पिता किमर्थं राजसभां गतः आसीत् ? ........................................

(ग) 'त्वं बालोऽसि! राजसभायां तव प्रवेशो न सुलभः' इति कस्य वचनम् ? ........................................

(घ) 'ईदृशीं तादृशीं वा आशङ्कां मा विधेहि' इति आश्वासनं कस्मै दीयते ? ........................................

(ङ) अष्टावक्रं दृष्ट्वा के उच्चैः अहसन्? ........................................

(च) अष्टावक्रः किं कृत्वा पण्डितान् अजयत् ? ........................................

(छ) राजसभायां मिथ्याज्ञानगर्विताः के ? ........................................

(ज) अष्टावक्रः कस्य विषये कथयति – 'अस्थि-रुधिर-मांस-मेदोभरिते चर्मवेष्टिते' इति– ........................................

(झ) 'यदि नदी वक्रा, किं तस्याः जलमपि वक्रम्' इति केन पृष्टम् ? ........................................

(ञ) किं वस्तु वंशपरम्पराप्राप्तम् ? ........................................

2. **पूर्णवाक्येन संस्कृतभाषया उत्तरत–**

(क) मातुः चिन्तां ज्ञात्वा कः राजसभां गन्तुम् उद्यतः आसीत् ?

........................................................................................................

(ख) राजसभायां कस्य उपहासः अभवत् ?

........................................................................................................

(ग) राजा जनकः अष्टावक्राय किम् अयच्छत् ?

........................................................................................................

(घ) मनसः किं कार्यम् ?

........................................................................................................

(ङ) राजा जनकः कस्य पादयोः पतति किमर्थं च ?

........................................................................................................

3. **एतादृशाम् प्रश्नानां निर्माणं कुरुत येषाम् उत्तराणि अधोलिखितवाक्येषु स्युः-**

**यथा-** (i) अष्टावक्रः जननीम् अपृच्छत् – मातः क्व आस्ते मम पिता ?

**प्रश्न** – अष्टावक्रः जननीं किम् अपृच्छत् ?

(ii) अष्टावक्रस्य पिता जनकस्य सभायां विद्वद्भिः सह शास्त्रार्थं गतः आसीत् ?

**प्रश्न** – अष्टावक्रस्य पिता जनकस्य सभायां कैः सह शास्त्रार्थं गतः आसीत् ?

(क) अष्टावक्रः प्रत्यवदत् 'जननि! अलं चिन्तया'।

..........................................................................................

(ख) राजसभायां बालकस्य वक्रदेहस्य उपहासोऽपि सम्भाव्यते।

..........................................................................................

(ग) अष्टावक्रः पितरम् आदाय क्षिप्रम् आगमिष्यति।

..........................................................................................

(घ) मात्रा अनुज्ञातः स राजसभां गतः।

..........................................................................................

(ङ) पण्डितानां चेष्टितं दृष्ट्वा अष्टावक्रः हसितुमारभत।

..........................................................................................

(च) राज्ञा हास्यकरणं पृष्टम्।

..........................................................................................

(छ) अष्टावक्रः मिथ्याज्ञानगर्वितान् दृष्ट्वा हसति।

..........................................................................................

(ज) राजर्षिः जनकः आत्मानं धन्यं मन्यते।

..........................................................................................

4. **अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'बालः अष्टावक्रः मित्रैः सह क्रीडित्वा गृहं प्रत्यावृत्तः।' अस्मिन् वाक्ये 'अष्टावक्रः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?

(ख) 'तं हसन्तं विलोक्य सर्वे सभास्थिताः विद्वांसः स्तब्धाः अभवन्।' अस्मात् वाक्यात् 'स्तब्धाः' इति पदस्य विशेष्यपदं चिनुत।

(ग) 'अहं भवद्दर्शनैः आत्मानं धन्यं मन्ये।' अत्र 'मन्ये' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

(घ) 'मात्रा अनुमतः अष्टावक्रः राजसभां गतः।' अस्मिन् वाक्ये 'अष्टावक्रः' इत्यस्य विशेषणं चिनुत।

(ङ) 'तस्य वक्रदेहं वीक्ष्य पण्डिताः तारस्वरेण अहसन्।' अत्र 'दृष्ट्वा' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(च) 'इच्छामि भवद्भ्यः किञ्चिद् दातुम् ' अस्मिन् वाक्ये 'स्वीकर्तुम्' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

**5. घटनाक्रमानुसारम् अधोलिखितवाक्यानि पुनः लिखत -**

(क) अष्टावक्रस्य पिता राजर्षेः जनकस्य सभां विद्वद्भिः सह शास्त्रार्थाय गतः आसीत्।

(ख) अष्टावक्रः मातरम् अपृच्छत्-मातः! क्व आस्ते मे पिता ?

(ग) मात्रा अनुमतः अष्टावक्रः राजसभां गतः।

(घ) अष्टावक्रः पण्डितानां चेष्टितं दृष्ट्वा उच्चैः अहसत्।

(ङ) पण्डिताः तं वक्रदेहं बालं दृष्ट्वा हसितुम् प्रारभन्त।

(च) हे राजन्! किं वक्रे देहे आत्माऽपि वक्रः भवति ?

(छ) जनकः अपृच्छत्-भो अष्टावक्र! किमर्थं हससि ?

(ज) अष्टावक्रस्य शास्त्रपाण्डित्येन सर्वे प्रभाविताः अभवन्।

(झ) अष्टावक्रः उवाच- एते मे देहं दृष्ट्वा हसन्ति, अहम् एतेषां मूर्खतां दृष्ट्वा हसामि।

(ञ) जनकः स्वमनः अष्टावक्राय यच्छति।

(ट) जनकः प्रभावितः सन् अष्टावक्राय किमपि दातुम् इच्छति।

(ठ) जनकः पराजितः भूत्वा अष्टवक्रस्य पादयोः पतति।

**6. समुचितं पर्यायपदं पाठात् अन्विष्य लिखत-**

(क) कुत्र ..................................

(ख) विस्मिताः ..................................

(ग) विलोक्य ..................................

(घ) समीपात् ..................................

(ङ) अधुना ..................................

**7. उचितविपरीतपदं चित्वा लिखत-**

| (अ) | | (आ) |
|---|---|---|
| (क) सुलभः | .................................. | (i) शनैः |
| (ख) क्षिप्रम् | .................................. | (ii) निर्गत्य |
| (ग) अर्पय | .................................. | (iii) अलौकिकम् |
| (घ) प्रविश्य | .................................. | (iv) दुर्लभः |
| (ङ) लौकिकम् | .................................. | (v) गृहाण |

8. **अधोलिखितानां वाक्यानां पूर्तिः उचितैः विशेषणैः कुरुत –**

निराकारः, ईदृशी, अलङ्कृता, भवदीयम्, सुलभः, सर्वशास्त्रपारङ्गतः, स्तब्धः, मिथ्याज्ञानगर्विताः

(क) अष्टावक्रः ........................ आसीत्।

(ख) अहो बालस्य ........................ निपुणता।

(ग) एतत् धनम् ........................ नास्ति।

(घ) ये ........................ ते सम्मानं न लभन्ते।

(ङ) राजसभा विद्वद्भिः ........................ अस्ति।

(च) मित्रस्य कटुव्यवहारं दृष्ट्वा अहं ........................ अभवम्।

(छ) आत्मा ........................ उच्यते।

(ज) उदारतागुणः न ........................।

## अन्वयः

1. **अन्वयः** – (अहम्) चर्चाम् विचारम् (च) कर्तुम् समर्थः न अस्मि। न यज्ञम्, न दानम्, न मानम् विहारम् (च कर्तुम् समर्थः अस्मि)। यदा कल्पनायाः क्षणः लभ्यः न अस्ति (तदा) मे प्रजायाः पालनम् कथम् प्रकुर्याम्।

## योग्यताविस्तारः

(क) **महाभारतम्** – महर्षिद्वैपायनव्यासप्रणीतं **महाभारतम्** भारतीयसंस्कृतेः विश्वकोशः इति मन्यते। कथ्यते च **यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।**

(ख) **भावविस्तारः**

(i) चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥
असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥
इन्द्रियाणि पराण्याहुः, इन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिः, यो बुद्धेः परतस्तु सः॥ (गीता)

(ii) गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।

# कोऽहं वदतु साम्प्रतम्

**नृत्यामि नित्यं धवलास्तरेषु, सङ्केतिताङ्कैः प्रकटीकरोमि।**
**भावं जनानां हृदयेषु गूढं, कृष्णाननाऽऽलोच्य वदन्तु काऽहम्॥**

**भावार्थः** – अहं प्रतिदिनं श्वेतास्तरणे नृत्यामि, समेषां हृदि विद्यमानान् भावान् सङ्केतेन प्रकटयामि, अहं कृष्णमुखिनी अस्मि, विचार्य सूचयतु, अहं का अस्मि?

# एहि हसाम

(पतिः कार्यालयात् आगत्य द्वारे एव भवति; तदैव तं रिक्तहस्तं दृष्ट्वा)

**पत्नी** – (पतिं प्रति) – अद्य कार्यालयात् आगमनसमये शाकानि आनेतव्यानि इति प्रातः भवन्तं सूचितवती आसम्। विस्मृतवान् वा? धिक् भवतः विस्मरणशीलताम्। भवान् तु सर्वदा एवमेव ........

**पतिः** – अये! "अहं विस्मरणशीलः अस्मि" इति भवती मा चिन्तयतु। कार्यालयतः आगमनकाले शाकानि तु अविस्मृत्य मया क्रीतानि आसन्।

**पत्नी** – तर्हि कुत्र सन्ति तानि?

**पतिः** – हन्त, अहं लोकयाने एव तानि परित्यक्तवान्, विस्मरणवशात्...